No. ४६३३

Title विनायक शाँतिः

Author ×

Extent १९ पत्राणि Age ×

Subject धर्मशास्त्रम्

सग्रह विनायक पूंजत्ति:

५६३३

4633
19

॥गच्छ त्वं भगवन्नग्ने स्वस्थाने कुंडमध्यतः
हव्यमादाय देवेभ्यः शीघ्रं देहि प्रसीद मे॥
। गच्छ गच्छ सुरश्रेष्ठ स्वे स्थाने परमेश्वर।
यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन॥
।रुद्रो युग्मान्द्विजेन्द्रांश्च रजततिलान्गुग्गु
लो नैवधूपो नो एपानैवर खड्गेन च वरतु
लसी पायसन्नैव शुद्धिः॥
॥हरिहर का सं॰ पत्र १५
॥कुशस्थाने च दूर्वास्युर्भगवत्स्याभिरूद्रये॥
॥वृत्तमंडलमादित्ये चतुरस्त्रं निशाकरे। महीपुत्रे त्रिकोणं स्याद् बुधे वै
बाणसंन्निभं। गुरवे पद्मिशाकारं पंचकोणं तु भार्गवे। शनैदे तु धनुषाकारं
शूर्पाकारं तु राहवे। केतूनां च ध्वजाकारं मंडलानि प्रकल्पयेत्॥
॥मध्ये तु भास्करं विद्याच्छशिनं पूर्वदक्षिणे। दक्षिणे लोहितं विद्या
द्बुधं पूर्वोत्तरेण तु॥ उत्तरेण गुरुं विद्यात् पूर्वेणैव तु भार्गवं।
पश्चिमे च शनिं विद्याद्राहुं दक्षिणपश्चिमे। पश्चिमोत्तरतः केतूनी
स्थापयेच्छुक्लतंडुलैः॥
॥जानिहरिकृष्णादिभागे॥
सामवेद
।अर्कपलाशखदिरस्त्वपामार्गोऽथ पिप्पलः
औदुंबरशमीदूर्वाकुशाश्च समिधः क्रमात्॥
॥होमांते ग्रहपूजा या प्रायश्चित्तं च स्विष्टकृत्॥
पूर्णाहुतिरभिषेकं ब्राह्मणेभ्यश्च दक्षिणा। होमस्य
कल्पनां कुर्याद् ग्रहाणां च विसर्जनं। बलिकर्म प्रकुर्वी
त तत्र शेषं समापयेत्॥ होमांते ग्रहपूजनं यजमा
नस्य चैव रनादि पूजा। ग्रहदान
ॐ ५ ५
=अलाभे तु प्रवृत्तव्यास्सर्वाः पालाशवृक्षजाः॥

ई॥ॐ नमो विघ्नहर्त्रे॥ अथ विनायकपूजनग्रहशांतेश्च पद्धतिर्लिख्यते। कर्त्तुः शोभने चंद्रे यथो
क्तभूमिग्रहणं मंडपमध्ये हरणं। मंडपमध्ये चतुरंगुलाधिकहस्तपरिमाणचतुरस्रस्य कुंड
स्य करणं त्रिमेखलस्यैकमेखलस्यैक वा। स्कंदपुराणे। नवग्रहमखे कुंडं हस्तमात्रं समं
भवेत्। चतुरस्रमधोहस्तयोनिवक्त्रं समेखलं। स्थंडिलं वा प्रकल्पयेत्। तत्र मेखला
त्रयपक्षे प्रथमा नवांगुलविस्तारा द्यंगुलोच्छ्राया द्वितीया तस्या उपरि बहिरंगुलद्वयं
त्यक्त्वा व्यासा सप्तांगुला उच्छ्रायेण त्र्यंगुला। तृतीया तस्या उपरि बहिरंगुलत्रयं त्यक्त्वा। उत्से
व्यासाभ्यां चतुरंगुला वांगुलन्यूनेनोक्तपरिमाणेनाधः खननं। एकमेखलापक्षे चतुरंगुल
विस्ता चतुरंगुलोच्छ्राया मेखला हस्तप्रमाणेन कुंडखननं। सप्तांगुलपार्श्वमानी कंठादशांगुल

।मम क्षेममायुरारोग्यपरमश्रीसुखावाप्तये। भार्यादिसबंधूनी चिंतितार्थस्यासिद्धये भूतभव्यभविष्यत्त्रिविघ्नोत्पात
कृशांतये। पाद्यमर्घ्यंकरिष्यामियथोक्तविधिनाह्यहं। आदिसाय्दहतः सर्वैर्कतोष्ज्याः प्रसीदतमंत्राधिष्टितदेवाः

दीर्घचतुरस्त्रं हस्तप्रमाणं चतुरस्त्रं पार्श्वमात्रं हस्तप्रमाणं परिखाप्रमाणं च योनिसाधनं। सप्तांगुलपार्श्वमात्री कुण्ड
एकां शांगुलोच्चयोनिः। कुंडादिशान्यां ग्रहस्थापनाय त्रिशांगुलोत्सेधकोद्धिहस्तप्रमाणस्य द्विवितस्तिप्रमा
णस्य वापीदस्यकरणं। दशांगुलं परिमाणं। ततः सर्वसंभारं संभृत्य प्राणायामपूर्वकं पूर्वसं
ध्यावंदनादि वैश्वदेवांतकर्म कृत्वा अद्येत्यादि देशकालौ संकीर्त्य अमुककामो वा अमुककर्मणः आ
रंभनिमित्तोत्पत्तिना विनायकोपसर्गनिवृत्त्यर्थं गणेशांबिकयोः प्रीत्यर्थं आदित्यादीनां नवानां
ग्रहाणां प्रीत्यर्थं विनायकस्नपनं ग्रहणमखं चाहं करिष्ये। एतत्कर्मप्रारंभनिमित्तं अविघ्नेनासि
ध्यर्थं गणेशांबिकयोः प्रीत्यर्थं गणेशांबिकयोः पूजनमहं करिष्ये। ततो गणेशपूजनं। ततः ब्रह्माचा
र्यकानां स्वस्तिवाचकानां ऋत्विजां वाक्यानां कर्मभूमौ समिदाज्याहरणं। शौचसंपादनाय यजमा
नकर्मांगत्वयास्निग्धस्नानानुष्ठानं। श्रद्धाऽवलंबनादिंद्रियसंयमनं। ततो ब्रह्मादीनामाचा

पाद्यं वो
दद्याम्यहं
स्वागतं वो
०

र्यादीनांपादप्रक्षालनं उदङ्मुखोयजमानः प्राङ्मुखाः ऋत्विजः। पूर्ववद्ब्राह्मणाः। ततः आचार्यस्य ततः
स्वस्तिवाचकानां। ततः ऋत्विजां। जापकानां। तत्रप्रयोगः अस्मिन्विनायकस्नपनकर्मणि नव
२ ग्रहमखकर्मणि च यजुर्वेदाध्यायिने ब्रह्मन् एतत्ते पाद्यं। आचार्य एतत्ते पाद्यं। स्वस्तिवाचैकैत
त्ते पाद्यं। ऋत्विक् एतत्ते। ततः स्वकीयौ पादौ प्रक्षाल्याचम्य। विनायकांबिकयोः आनुत्तारणं स्था
पनं। ततोवरणं। तत्र प्राणायामत्रयं विधायाचम्य शान्त्यनुवाकं पठित्वा ऽपवित्रः पवित्रो वे
त्यादिसप्तमावधमः वरणे पाहारणां पवित्रतास्तु। ॐभूः ॐभुवः ॐस्वः इत्यादि। उपास्मै गायता नरः
मा पवमानायेन्दवे। अभिदेवाँ इयक्षते। १ अभि ते मधुना पयो ऽथर्वाणो अशिश्रयुः देवं देवाय देवयु।
२ सनः पवस्व शं गवे शं जनाय शमर्वते। शं राजन्नोषधीभ्यः। ३ बभ्रवे नु स्वतवसे ऽरुणाय
दिविस्पृशे। सोमाय गाथमर्चत। १ हस्तच्युतेभिरद्रिभिः सुतं सोमं पुनीतन। मधावा धाव २

तामधुं।५।पहे त्वायवान्त्र कीर्य। अत्राद्य मासे पक्षे तिथौ ब्राह्मणः आचार्यस्य स्वस्ति वाचनिका
निकृत्विजां त्रापकानां च वरणमर्चनं पुण्याहवाचनं चाहं करिष्ये। ततोऽयवान्त्र हीत्वा अमुक
सगोत्र अमुकशर्मन् वस्त्रयुग्मदक्षिणेन विनायकशान्ति कर्मणा धेन्वाद्युक्तदक्षिणेन न
वग्रहमख कर्मणा च। अथ वासुवर्णदक्षिणेनाहं यस्यो तत्रमे त्वमाचार्यो नवं ग्रहं स्वस्ति
वाचको भव। यद्यं जापको भव। यूयमृत्विजो भवथ। अर्घवस्त्राद्यैराचार्यादीनामर्चनं। अत्रा
दि ब्राह्मणानां॥ इदमर्चितं ज्योतिश्च। अर्चनविधेः परिपूर्णतामस्तु। आचमनं। अक्षन्नमीमदन्त
ह्यवप्रिया अधूषत। हरी। दास्यमानं यथोपपन्नं दक्षिणपर्यन्तं भोजनं आचार्यते स्वाहा। सु.
प्रोक्षितादि दक्षिणासंकल्पः। दक्षिणाः पांतिस्वाशीः। अस्य वरणकर्मणो यन्न्यूनातिरिक्तं सर्वं भव
तां प्रसादात् परिपूर्णमस्तु। गृहे इष्टिशतानि च वंतु। उत्तरे कर्मण्यनिर्विघ्नमस्तु। आशीर्वादः। मी

गत्यां ततो ऽस्य यागस्य निष्पत्त्यै भवंतो ऽभ्यर्थिता मया। सुप्रसादं प्रकर्तव्यं कर्मैतद्विधिपूर्वकं। इ
त्यनेन आचार्यादीनां प्रार्थनं। एवं करिष्यामः। ब्राह्मणाः अद्य पूर्वोक्त यथाशक्ति आचार्यकर्माहं
करिष्ये। कुंडादुत्तरतो भद्रासनं हस्तमात्रं चतुरंगुलाधिकं आनडुहचर्म भद्रासने स्थापनं। प
रितश्चतुर्दिक्षु कलशस्थापनं। समाचारात्कलशानामधस्तात्सप्तधान्यनिक्षेपः। ततः कुंडे पंच
भूसंस्कारान्कृत्वा अग्नेः स्थापनं। ग्रहपीठ ईशानकोणे। पीठ वस्त्राच्छादिते श्वेताक्षतैरष्टदल
पद्म करणं। ततः गणेशांबिकयोः पीठे रक्तवस्त्राच्छादिते रक्ततंडुलैः पद्म पूरयित्वा स्थापनं। त
तः सर्वौषधिसंयुक्त सरत्न पल्लव सवस्त्र रुद्रकलश स्थापनं। पद्ममध्ये सूर्यस्थापनाय अष्ट
त्रं मंडलं लिखेत्। आग्नेयदले सोमचतुरस्त्रं। दक्षिणे भौमस्य त्रिकोणं। ईशाने पत्रे बाणाका
रं उदयगयतां बुधस्य। उत्तरे दले दीर्घचतुरस्त्र उदगायतां गुरोः। पूर्वस्मिन्दले शुक्रस्य पं २
चकोणं। धनुषाकारं पश्चिमे शनेः। नैर्ऋत्यदले शूर्पाकारं राहोः। वायव्यदले ध्वजाकारं के

हूनां। एतेषां मंडलानि प्रमाणानि। द्वादशांगुलं सूर्यस्य। चतुर्विंशत्यंगुलं सोमस्य। त्र्यंगुलं भौमस्य। चतुरंगुलं बुधस्य। षडंगुलं गुरोः। नवांगुलं शुक्रस्य। द्व्यंगुलं शनेः। पंचविंशत्यंगुलं राहोः। सार्द्धैकांगुलिं केतूनां। सूर्यसोमगुरुशुक्रराहूणां मंडलान्यसंभवात् हेत्वैनोक्तप्रमाणानि कलेरूपाणि कार्याणि। इतरेषामहेत्वेनाफलेन स्वप्रमाणेन। ततः प्रक्षालितैः शालितंडुलैः सर्वग्रहावाह्य माणोसुस्थापनं। तत्र ॐ भूर्भुवः स्वः उदयं तमहातेज तेजस्विनं शुभप्रदां दुर्निरीक्ष्यं सुगमनं सूर्यमावाहयाम्यहं। भो भो सूर्य ग्रहाध्यक्ष कलिंगविषयोद्भवारक्त काश्यपगोत्र यद्दिनु जः पद्मलांछनः। सप्ताश्ववाहनाग च्छ पद्ममध्ये वरप्रद। अग्निर्दूतेति मंत्रेण रुद्ररूपी प्रतिष्ठितः। अग्निर्दूतेत्युच्चार्य पद्ममध्ये सूर्यस्थापनं। ॐ भूर्भुवः स्वरिति सर्वत्रादौ ज्ञातव्यः। द्विजराजसुरश्रेष्ठ ताराधिपते नंदन ऋषधीनां स्वगमनं सोमं मावाहयाम्यहं। अहो चंद्र जग

४ त्राणायमुनाविषयोद्भवासुश्वेतात्रेयगोत्रेयगदापाणेवरप्रदा ध्येशा वाहनायाहिउमारु
पीसमाविश । हुताशनदले देवमंत्रेण स्वग्निनार्चितः । अस्वचेस धिष्टवेतिमंत्रेणाग्ने
यदलेसोमस्यस्थापनारा । निर्जितारं च शत्रूणां यजमानाधिदैवतां ऋषिभिस्तूयमानं भौ
ममावाहयाम्यहं । उज्जयिन्यां समुसन्नोनो भो भौमचतुर्भुजा भरद्वाज कुलेजातः शूल
शक्तिगदाधरा । वरदो मेषमारूढस्कंदप्रायतडिप्रभा । स्योना पृथिवि मंत्रेदलेयाम्यप्र
तिष्ठितः । स्योना पृथिवि मंत्रेण दक्षिणेदले भौमस्थापनं । बुधो बुद्धिप्रदाना च सौम्य
दृष्टिर्महायशाः । यजमानहितार्थाय बुधमावाहयाम्यहं । अहो चंद्रसुत श्रीमान् मागधायां
समुद्भवं । अत्रिगोत्रचतुर्बाहो षड्गखेटकधारक । गदावरदसिंहस्थसुवर्णाभसमाविश । ४
ऋक्षवरीशपत्रे च इदं विष्णुश्चप्रजितः । इदं विष्णुरिति मंत्रेण ईशानदले बुधस्थापनं । ४

बुध्या यस्य समो नास्ति देवतानां पुरोहितः। त्वा तारं सर्व देवानां गुरु मावाहयाम्यहं॥ अहो वाच
स्पते पीत सं जातः सिंधुमंडले। एह्यांगिरस गोत्रेय हयारूढ चतुर्भुजा दंडाक्षसूत्र वरद क
३ तिमंत्रे मंडलु धर प्रभो॥ मम हाँ हूं हैं एं गुं नरदलेष्ठ हस्पतिस्थापनं॥ ५॥ सोमत्नुत्योद्दितः प्राप्तोग्दानवा
नां पुरोहितः। शास्ता च सर्व दैत्यानां शुक्रमावाहयाम्यहं॥ भो भो भो जकट जातस्तु कंधेता
श्ववाहनः। समागच्छ चतुर्बाहो भृगुगोत्र विभूषण॥ परिव्राजा वजी हस्ते कमंडलु ध
र प्रभो। शक्रवत्सर्व पत्रे च शुक्र ज्योतिष्य पूजितः॥ शुक्रज्योतिश्चेति मंत्रेण अथर्ववेदजे शुक्र
स्थापनं॥ ६॥ कृष्णांगः कृष्णवर्णश्च कृष्णाजिनधरस्तथा। सौरो मंदगतिश्चैव शनिमावा
हयाम्यहं॥ अहो सौराष्ट्र संजातश्छाया पुत्रश्चतुर्भुजः। कृष्णवर्णार्क गोत्रेय बाण हस्त
धनुर्धरः। त्रिशूली च समागच्छ वरदो गृध्रवाहनः। प्रजापतेति संप्र ज्योयमवत्तांश्चिमेद

ला प्रजापते न त्वदेतान्यन्य इति मंत्रेण पश्चिमे दले शनैः स्थापनं ।७।। रक्तांगो रक्तवर्णाश्च र
।।५।। क्ताजिनधरस्तथा। सिंहकायां समुत्पन्नो राहुर्मा वाहयाम्यहं। राहो बर्बरकेदेशे संजातः
कायवर्जितः। गोत्रे पैठीनसी ह्येहि सिंहारूढो वरप्रदः। करालवदनश्रेष्ठ कालरूपी
5 जनप्रमा। आयं गौरिति मंत्रेण एज्यो नैर्ऋति पत्रके। आयंगौरिति मंत्रेण नैर्ऋतदले रा
हुस्थापनं।।८।। एह्येहि भगवन् केतो व्योमचारी महाद्युतिः। ग्रहैश्च सहितैः सर्वैः केतुं मा
वाहयाम्यहं। केतवो विविधाकारा मलयाद्रिसमुद्भवाः। जैमिनेर्गोत्रे गदाह
स्त वरप्रदाः। आगच्छंतु कपोतस्थाः शोभने मारुते दले। ब्रह्मज्ञानमंत्रेण चित्रगुप्त
रुद्वार्चिता। ब्रह्मज्ज्ञानं प्रथमं मिति मंत्रेण उत्तरापरदले केतूनां स्थापनं।। सर्वे आदि ।५।
त्यादि मुख्यास्थाप्याः इति मत्स्यपुराणे।। अथ देवतास्थापनं मुच्यते। त्र्यंबकमिति मंत्रेण
सूर्यस्योत्तरतो रुद्रं स्थापयेत्।।१।। श्रीश्च तेति सोमादाग्नेय्यां मेनकात्मजाय स्थापनं।२।

भौमस्य दक्षिणतो यदक्रंद इति स्कंदं स्थापयेत्॥३॥ बुधात्पूर्वस्मिन् विष्णोरराट इति विष्णुं॥४
गुरोरुत्तरतः आ ब्रह्मन्निति ब्रह्माणं॥५॥ शुक्रात्पूर्वतः सजोषा इन्द्र इति शक्रं स्थापयेत्॥६॥
शनेः पश्चाद्यमाय त्वा मखाय त्वेति यमं॥७॥ राहोरुत्तरतः कार्षिरसीति कालं स्थापये
त्॥ केतुभ्यो नैर्ऋते भागे चित्रावसोः स्वस्ति त इति चित्रगुप्तस्थापनं॥८॥ अथाधिदेव
तास्थापनं॥ सूर्यमंडले रुद्रादाग्नेयकोणे सनः पितेवेति अग्निं स्थापयेत्॥१॥ मेन कालम
जाय नैर्ऋते अपो अद्येत्यपः सोममंडले॥२॥ भौममंडले स्कंदाद्वायुकोणे चिद्रसि धरां
स्थापयेत्॥३॥ बुधमंडले विष्णोरुत्तरतः इदं विष्णुरिति विष्णुं॥४॥ गुरुमंडले ब्रह्मण उत्त
रभागे इन्द्र आसान्नेतामिति इन्द्रं॥५॥ शुक्रात्पश्चिमे इन्द्रदेवीरित्यैन्द्रीं॥६॥ शनिमंडले यमात्प
श्चिमे प्रजापते न त्वदिति प्रजापतिं॥७॥ राहुमंडले कालात्पश्चिमे नमोस्तु सर्पेभ्य इति

सर्पान्॥८॥ केतुमंडले॥ चित्रगुप्तादीशाने ब्रह्मजज्ञानमिति ब्रह्माणं॥९॥ अथ पंचस्याधिदेवताः।
यहदेवतयोर्मध्ये आनो भद्रा अनुवाकेन यथाक्रमं स्थाप्या। सूर्यकेतुगुरुशनिकेतूनां म
ध्ये गणानां त्वेति मंत्रेण गणेशस्थापनं॥१॥ गणेशस्य दक्षिणतो जातवेदस इति दुर्गास्था
पनं॥२॥ गणेशादुत्तरतो वायो ये तइति वायुं॥३॥ गणेशपूर्वेण या वां कशेत्यश्विनोस्था
प्यौ॥४॥ गणेशस्य पश्चात् घृतं घृतपावान इति अंतरिक्षस्थापनं॥५॥ विनायकपंचक
स्योत्तरतः अग्नेत्र क्षेत्रनिधनं स्थापयेत्॥१॥ विनायकपंचकस्योत्तरतः धनदस्य पु
रस्तात्। अथवा विष्णोरुत्तरतः श्रीश्चतेति श्रियस्थापनं॥२॥ अथ नक्षत्राणां स्थापनं। ईशा
नादारभ्य प्रदक्षिणं पुरस्तात् अश्विन्यादीनि पुनर्वसुपर्यंतानि सप्त नक्षत्राणि। अश्विना ६
तेजसा। अश्विनी॰१। यमाय त्वेति भरणी॰२। अयमग्निः॰ कृत्तिका॰३। ब्रह्मजज्ञानं रोहिणी॰

सोमोधेनुमितिमृगशिरं०।५। नमस्ते रुद्र मन्यव० आर्द्रा०।६। अदितिर्द्यौः पुनर्वसू०।७। एभिर्मन्त्रैः
स्थापयेत्। दक्षिणतः पुष्यादीनां चित्रापर्यन्तानां सप्तानां स्थापनं। वाचस्पतये पवस्व०।१।
पुष्यं।। नमोस्तु सर्पेभ्यः० आश्लेषां।२। पितृभ्यः स्वधायिभ्यः मघां०।३। भगप्रणेतः पूर्वफाल्गुनीं०
।४। दैव्यावध्वर्यू उत्तराफाल्गुनी०।५। विभ्राड् बृहत् हस्तं०।६। त्वष्टा तुरीपः चित्रां।७। इत्येभिर्मन्त्रैः स्था
पनं। पीवो अन्नारयिवृधः० स्वातीं०।१। इन्द्राग्नी आगतं० विशाखां०।२। नमो मित्रस्य०।
अनुराधां०।३। सद्युहस्तैः ज्येष्ठां०।४। मातेव पुत्रं मूलं०।५। अपाघमपकिल्बिषं स्ती० पूर्वा
षाढां०।६। विश्वे अद्य उत्तराषाढां०।७। एभिर्मन्त्रैः स्थापनं। उत्तरतो अभिजिच्छ्रवणादिरे
वत्यन्तानां सप्तानां। तत्सवितुः श्रवणं।१। इदं विष्णुः० अभिजितं।२। वसोः पवित्रमसि शतधारं
धनिष्ठां०।३। वरुणस्योत्तम्भनं।४। तमिषा उत नो अहिर्बुध्न्यः।५। पूर्वाभाद्रपदा।५। शिवोनामासि०

उत्तराभाद्र०।४।पूषंनवव्रते०रेवती।१।एभिर्मंत्रैः यथासंख्यंस्थापनं।२०।योगेयोगेतवस्तरं
मितिरेवतीसंनिधानेयोगानांस्थापनं।१।भद्रंकर्णेभिरिति रेवतीसंनिधानेकर्णानांस्था
पनं।२।अथध्रुवादि।सूर्यादुत्तरे ध्रुवासिध्रुवोयमितिमंत्रेणध्रुवस्थापनं।१।सूर्यात्पश्चि
मेपंचनद्यइतिमंत्रेणनद्यःस्थापनं।२।सूर्यस्योत्तरतः सप्तऋषयइतिमंत्रेणऋषी
णांस्थापनं।३।सूर्यात्पश्चिमेदेशोसरितोधः इमंमेवरुणेतिसागराणांस्थापनं।४।ध्रुव
स्योत्तरतः प्रपर्वतस्येतिपर्वतानांस्थापनं।५।सूर्यात्पश्चिमेजवोयस्तेइतिरेवंतस्था
पनं।६।विष्णुसंनिधानेसुपर्णोसीतिगरुडंमंत्रस्थापनं।७।[illegible]जे।कलशम
ध्येअसंख्यातेतिरुद्रस्थापनं।८।रुद्रस्यवामेउत्तरभागेसहस्रशीर्षोषोडशर्चेनवि ८॥
ष्णुस्थापनं।९।कलशमध्यएव।तत्रैवदक्षिणेभागेरुद्रस्यप्रजापतेनत्वदिति प्रजाप

पतेस्स्थापनं ।१०। पीठस्य निर्ऋतिकोणे वास्तोष्पते प्रतिजानीह्यस्मान्स्वावेशो अनमीवो न

वा नः । यत्त्वेमहे प्रतितन्नो जुषस्व शन्नो भव द्विपदे शं चतुष्पदे इति वास्तुस्थापनं ।११

पीठस्य वायव्ये गणानां त्वेति गणेशस्थापनं ।१२। पीठस्याग्नेय्यां नमोस्तु सर्पेभ्य इति

क्षेत्रपालस्थापनं ।१३। यद्यपि आग्नेय्यामेव अदितिर्द्यौरिति लोकपालस्थापनं ।१४।

रुद्रस्य कुम्भस्याग्रे पीठस्योपर्ये व जातवेदस इति चामुंडास्थापनं ।१५। चामुंडायाउत्त

रे यो वः शिवतमेति मातृमंडलस्थापनं ।१६। ऋग्वेदादि वेदानां प्रागादिक्षु यथाक्रमं

७ पूर्वस्या पूर्वस्मिन् वेदादि मिंद्रस्थापनं अथवा ऋग्वेदादीन् इदं विष्णुरिति ।१। दक्षिणतो यजुर्वे

दं त्रीणि पदेति ।२। पश्चिमे सामवेदं विष्णोः कर्माणीति ।३। उत्तरे अथर्ववेदं तद्विष्णोः परंप

दमिति ।४। श्रीश्च ते लक्ष्मीश्च श्रियः स्थापनं ततः दिक्पालपूजा । प्राच्यां त्रातारमिंद्रं इतींद्रस्था

८

पयेन्द्रं।१। आग्नेयां त्वंन्नो अग्न इति त्यग्निं।२। याम्यां सुगन्नु पंथेति यमं।३। नैर्ऋत्ये असुन्वं
तेति निर्ऋतिं।४। पश्चिमे तत्वा यामीति वरुणं।५। वायव्ये आ नो नियुद्भिरिति वायुं।६। उत्त
रस्यां वयं ६ सोमेति धनदं।७। ईशान्यां तमीशानेति शंकरं।८। ऊर्ध्वं अस्मे रुद्रा इति ब्रह्म
णं।९। अधः स्योना पृथिवीति हरेः स्थापनं।१०। प्रतिक्षत्र इति प्रतिष्ठाकरणं। विना
याकांबिके आदित्याद्याग्रहा अत्र पीठे स्थापितदेवता अधिदेवता प्रत्यधिदेवता
सहिताः सुप्रतिष्ठिता वरदा भवन्तु। शास्त्रोक्तम् त्रियुक्तानां संमुखानां वरप्रदानां चिं
तनं। जन्मादिभिश्चिंतनं चात्रिप्रभृतिभिर्वस्त्रैः प्रत्येकं ग्रहाणामावाहनं। अथ वा एके
नवस्त्रेण सर्वेषां ग्रहाणां परिधापनं। अस्मिन्पक्षे वस्त्रयुग्मेन वेष्टनं रक्तचंदन रूद्रकलश ८
श्रीखंड रक्तचंदन चतुःसमं चतुःसमः। श्रीखंडानि सूर्यादीनां पंचसंख्यया संख्या।
केसरचंदनं त्रयाणां शनैश्चरादीनां। कस्तूरिकाया द्वौ भागौ चत्वारश्चंदनस्य चा कुंकु ।८।

मश्चत्रयश्चैकः शशिनस्याच्चतुःसमंमितिचतुःसमलक्षणं।शशिनइति कर्पूरस्य सर्पः
करवीरपुष्पं।कुमुदराजपापुष्पा।चंपकंशतपत्रं।जातीपुष्पं।मल्लिकापुष्पः।कुंदपु
नानाविधपुष्पैर्यथाक्रमंसूर्यादीनांपूजनं।कुंदरकतंदुलाज्यसर्जरसत्र्यगरुबिल्वगु
गुलानवयथाक्रमंधूपः।अथवासर्वेषांगुग्गुलधूपोरेवा।धूपोदेयस्त्वगुग्गुलुरिति
याज्ञवल्क्योक्तत्वात्।वसवस्त्वेतिधूपयेत्।।गुडमिश्रओदनः।पायसंघृतं।कसारः।दु
ग्धान्नं।दध्यन्नं।घृतान्नं।कृशरा।मारवान्नं।विचित्रान्नं।।२।इतिसूर्यादीनांयथा
क्रमंनैवेद्यानि।द्राक्षा।इक्षु।पूग।नारिंगं।जंबीरं।उन्नती (खारीक)।नालिकेरा।दाडिमानि
यथाक्रमंसूर्यादीनांफलानि।अत्र चंदनादिपदार्थानुसमयेन कर्तव्यं।सर्वेषांचंद
नादित्वपुष्पादितथैवदेयं।अत्रदेवता अधिदेवप्रत्यधिदेवतानांस्वप्रधानंग्र
हजातीयं।चंदनादिसमिदंतंनियतं।अन्येषांसाधारणं।त्रयत्रयपोक्तफलपुष्पाद्य

लाभे वर्णगंधादिसंपन्नांग्राह्या। निषिद्धवर्ज्जा। चंदनादिसर्वं स्थापनमंत्रैर्दातव्यां सर्वेषां तांबू
लदानं। घृतपूरितस्य नववर्त्तियुक्तस्य दीपस्य तेजोसीतिमंत्रेण दानं। प्रवालमौक्ति
कप्रवालशुद्धसुवर्णशुद्धमौक्तिकादिनि सूर्यादीनां षण्मां। शन्यादीनां त्रयाणां रजतं॥
प्रवालादिमिग्रहाणां यथाक्रमं पूजनं। बलिदानान्यपि प्रणवादिनमोंतानाममंत्रैरेव
कुर्यात्॥ बलिदानं दिक्पालानां। नालिके: आदित्याद्याग्रहाः सर्वे पीठे येयत्रप्रतिष्ठिताः
७मि ते गृह्णन्तु मयादत्तं मम र्घ्यं नमो नमः। इत्यर्घ्यदानानि। नमस्कारः। प्रार्थना। आदि
त्यस्याप्युपस्थानं कर्त्तव्यं॥ हूतिमिछना। नमस्ते सर्वलोकेषु शतरश्मीतमोनुदः। पातु मे
देवदेवेशोअस्मिं सौभाग्यं वास्तु मे सदा। आयुर्विद्यां बलं दत्त्वा रोगेः शौर्यं च पुष्कलं। पुत्रां
दत्त्वा धनं दत्त्वा यशः शौर्यं च पुष्कलं। इति प्रार्थना। अग्नेरुपवेशनाद्याज्यभागांतं कृत्वाः। ॥६॥
सर्वान्कामांश्च दत्त्व मे।

चरूपाकांतंतैललोविनायकांबिकयोः संक्षेपपूजा। ततः श्रुतामिघारणौ आज्यभा
गौताकुशांडिकायहूणं। मितायसंमितायशालायकटंकटायकूष्मांडयराजपुत्रा
यजुष्टंगृह्णामि। तथा आदित्यायसोमायांगारकायबुधायबृहस्पतयेशुक्रायशनै
श्चरायराहवेकेतुभ्योजुष्टंगृह्णामि। प्रोक्षणौमितायं०राजपुत्रायत्वाजुष्टंप्रोक्षामि।
तथा आदित्याय०राहवेकेतुभ्योत्वाजुष्टंप्रोक्षामि। आज्यभागांतेचर्मणिभद्रासन
स्थापनं। यजमानस्यवस्त्रंस्त्रसमर्पणं। भद्रासनोपरिउपवेशनं। पोरिवेयं। कलशे
पूकोपहारप्रक्षेपः। गौरसर्षपकल्केनसाज्येनोत्सादनं। सर्वौषधैः सर्वगंधैःशिर
सानुलेपनं। स्वस्तिवाचनं। पुण्याहंदीर्घमायुरस्त्विसादिद्विपदस्थलुष्परेभ्यःसुशां
तिर्भवतु। अस्यस्वस्तिवाचनकर्मणःसमृध्यर्थंहिरण्यदक्षिणांतन्निष्क्रीभूतंद्रव्यंजाप
केभ्यःस्वस्तिवाचकेभ्योब्राह्मणेभ्यश्चाहंसंप्रददे। अस्यभद्रासनोपविष्टस्यममदासस्यमा

नानि मांजिष्ठानि बार्हस्पत्यानि वासांसि रक्तवस्त्रद्वंद्वानि यथासंख्या कानि भगवतीजगज्ज
ननीभ्यं विकाशीन्यर्थं च तस्तभ्यः सुवासिनीभ्यः अर्हसं प्रदद्यो यो यो विनागः सम्प्रातिष्ठ
द्यतानां दक्षिणाः पाविस्याशीः अस्य स्वस्तिवाचनकर्मणः यन्न्यूनं तदस्तु सुवासिनीभि
10 र्मांगल्यकरणं। ततः कुंभतोयेनाभिषेकः। पूर्वेण कुंभेन सहस्राक्षमिति प्रदक्षिणेना
दक्षिणे। भगं ते वरुणेति। पश्चिमे यत्ते केशेष्विति। उत्तरकुंभं प्रदक्षिणमादाय पश्चात्सप्त
श्रुरसः सहस्राक्षमिति त्रिभिर्मंत्रैरभिषिंचेत्। यजमानस्य मूर्द्धनि सव्यहस्ते कुशस्तेषु
प्राग्ग्रेषु कुशेषु औदुंबरेण स्रुवेण तिष्ठन् सर्षपतैलहोमः। मितायस्वाहा। इदं मिताये
ति त्यागः। संमितायस्वा०। इदं संमिताय। शालायस्वाहा। इदं शालाय। कटंकटायस्वा०
इदं कटंकटाय। कूष्मांडायस्वा०। इदं कूष्मांडाय। राजपुत्रायस्वाहा। इदं राजपुत्राय। त
यजमानस्य चयास्नानी ततः शुक्लांबरधरः शुक्लमाल्यानुलेपनो दक्षिणतउपविश्य १०॥

पितायस्मो हस्ताहिभिषड्भिर्मन्त्रैः आचार्यश्चरुहोमं कुर्यात्। ततो वरुणस्योत्तननमितिपंच
वारुणहोमः। आचार्यस्य वह्निः प्रजा गंधपुष्पाक्षतैः पूजा। ॐ कपिलायनमः। ॐ पिंगलायनमः
धूम्रकेतवेन। जठराग्नये। शिखिनेन। हारकाय। महातेजसे। कुलाशनाय। रौद्राय
बलिदानं। इंद्रायनमः इंद्रानुचरेभ्यो। १। अग्नये। अग्न्यनुचरेभ्यो। २। यमायनः। यमानु
चरेभ्यो। ३। निर्ऋतेनन। निर्ऋत्यनुचरेभ्यो। वरुणाय। वरुणानुचरेभ्यो। वायव्ये। वाय्वनुच
रेभ्यो। धनदायनः। धनदानुचरेभ्यो। ईशानायनः। ईशानुचरेभ्यो। ब्रह्मणेनमः। ब्रह्मानु
कनिष्ठपक्षे अष्टौ वा अलाभात् पालाश्यः चरेभ्यो। हरयेनः। हर्यनुचरेभ्यो। १०। ग्रहाणांउ क्तसंख्यया अर्कपलाशखदिरापामा
र्गपिप्पलोदुंबरशमीदूर्वाकुशानां समिधो मंपाकमंपि चाम्रतलुताजुहुयात्। आकृ
ष्णेनमं देवा अग्निर्मूर्द्धा उद्बुध्यस्व बृहस्पते अतिअन्नात्परिस्रुतः शन्नोदेवीः काण्डात्
डात्के तुंकृण्वंनित्यैर्निर्मन्त्रैः प्रतिमंत्रं होमे होतव्यो। अर्वाशिष्टदेवतानां तिस्रः तिस्रः स
मिधस्थापनैर्मन्त्रैः। ग्रहाणामेवाज्यस्य चरुहोमः। तिलहोमः॥ तत्रविधिः मत्स्यपुराणोक्त

मविधा

समिदाज्यंच रुहोमस्तिल होमः क्रमेण तु। एकैकया घृताहुत्या एकैकान्नु चरु स्तथा।

पुराणे। मंत्रैरीशाकुत्तीकृत्वा होमं व्याहृतिव्याहृतिभिस्ततः। उपस्थितः प्राङ्मुखो नाकुर्यात्तद्
ग्रहाणां पुंगवाः। अत्र होमे ग्रहाणां आकृष्णेनेत्यादयएव मंत्राः। शेषाणां स्थापनमंत्रा एव ज
सहोमे मत्स्यपुराणात्॥ ॥उभयोश्च वीरस्विष्टकृदादि प्राजापत्यांतं। ततो गणेशां। बि
कयोः पूजनं षोडशोभिरुपचारैः। तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि। तन्नो दंती प्रचोद
यात्। इति गणेशगायत्री। सुभगायै विद्महे काममालिन्यै धीमहि। तन्नो गौरी प्रचोदयात्।
इति अंबिका गायत्री। तत्र प्रयोगः। अद्येत्यादि देशकालौ संकीर्त्य सर्वारिष्ट परिहारा
र्थं अमुककामसमृद्ध्यर्थं अमुककर्मणः प्रारंभनिमित्तं विनायकांबिकयोः पूजनमहं क
रिष्ये। तत्र चंदनादिभिः स्वगात्रा संपूज्य तत्पुरुषाय इति नेदं मंत्रादिभिः। सुभगायै काममालि
न्यै गौर्यै इदं मंत्रादि पूजनं। धूपं दत्वा कृतान्नादि नैवेद्यदानं। कृत्वा कृतांजलिः ददृ वहतां। ॥ ११
पलसोदन तिलमिश्रकुंदन्न आमान्नं अपक्वान्नं मस्याः मांसमेतावदेतु वा। मिपक्वमपक्वमांसामि
षाः। पुष्पं चित्रं रक्तपीतादि सुगंधसुगंधि द्रव्यं। त्रिविधसुरा गौडी। पैष्टी। माध्वी। मूलकं।

देशकारोनस्यविशेषो मूलकं वा। उंडेरकस्रजा। तुंडेकारः पिष्टविकारो नानाविधप्रोताः स्रजउच्यं
ते। गुडपिष्टा। गुडपिंडशाल्यादिपिष्टं। अन्यत्प्रसिद्धम्। इदं वैश्रवणरूपादिस्थं कृत्वा कृतादिनैवेद्यं
गंधाय स्वीतं तत्पुरुषाय० यात्वात तत्पुरुषाय वक्रतुंडाय दंतिने नमः। एवमंबिकायाः प्राणा
यामः। कुसुमोदकेनार्घदानं दूर्वासर्षपपुष्पाणां पूर्णमंजलिदानं। उपस्थानं द्वयोः रूपं दे
हि यशो देहि भगं भगवन् देहि मे। पुत्रान् देहि धनं देहि सर्वान्कामांश्च देहि मे। इति गणेशो
पस्थानं। अथ अंबिकोपस्थानं। रूपं देहि० भगं भगवति देहि मे। पुत्रान् देहि मे०। विनायकां
बिकयोः पूजनं संपूर्णमस्तु। ततो यजमानस्य संक्षिप्तविधिना नवग्रहाणामेव पूजनं।
न देवादीनां। ततः पूर्णाहुतिः। तत्र कुंभे दीप्ते श्रीपर्णीमयीं खादिरीं वा वैकंकतीं वा चतुःस्रुवं दर्भैः
संमृज्य प्रक्षाल्य ततः स्रुवेण घृतपूर्णां कृत्वा पुष्पचंदनैः स्रुवं स्रुचं च अभ्यर्च्य स्रुचमुपरि स्रुवः
स्रुगभिमुखं कृत्वा सव्यहस्ते नाभिमूले धृत्वा शुक्रज्योतिरित्यनुवाकेनाग्नये स्वाहेत्यस

हितेनाबिन्नधार्यारेजुहुयात्। ततः समाचाराद्दत्विजः पुष्पाणि हस्ते गृहीत्वा इदं देवीरित्य
तः प्रारभ्याऽध्यायसमाप्तिं यावत् पठंति। ततः शंतुर्भिश्चालिभ्यो कंपठित्वा तानाग्नौ प्रक्षि
पंति। तत्राहितुपयमनस्याग्नौ प्रक्षेपांतं। शेषसमाप्तिः। होमनिवेदनं। अस्मिन्कर्मणि
यद्यद्द्रव्यं यावद्यावत्संख्याकं येनयेनमंत्रेण कृतं यस्यैयस्यै देवतायै तत्तद्द्रव्यं तावत्ता
वत्संख्याकं येनयेनमंत्रेण कृतं यस्यैयस्यै देवतायै सा सा देवताः प्रीयंतां। ते देवाः शांति
दा पुष्टिदा वरदा भवंतु। ततो आचार्यः पंचाग रुद्रजपं कुर्यात्। ततो यजमानः अग्नेः प
श्चिमतः आत्रादिले पट्टे सपरिवार उपविश्य। आचार्यादयः कलशमुखस्थ पल्लवैः क
लशोदकेनाभिषिंचति। तत्र मंत्राः। आपो हिष्ठा ३ ता तारामिंद्रः १ विरुणस्यो त्तंभनं १
मगप्रणेतः इमापः समुद्रा पुनंतु मा। आप्यायस्व पंचनद्यः शिरोमे इति एं चाभिः देवस्य
त्वा त्रिभिर्मंत्रैरभिषेकं पुनःपुनः॥ दुग्धाब्धि मंथनोद्भीर्णा देवानां वंदनीयकाः। कामधे १२
नुः प्रसीदंतु यजमानस्याहर्निशं॥१॥ पांचजन्यो महाशंखः श्रीवत्सांकः करोद्यताः। सर्व

विघ्नोपशमनार्थमतः शांतिंप्रयछंतु।१।शक्रादिदेवताःसर्वाब्रह्माविष्णुमहेश्वराःसु
रास्त्वामभिषिंचंतुप्रयछंतुधनानिच।२।नारायणोजगंनाथस्तथासंकर्षणोविभुः
प्रद्युम्नश्चानिरुद्धश्चभवंतुविभवायते।३।आखंडलोग्निर्भगवान्यमोवैनिर्ऋतिस्तथा
वरुणंपवनश्चैवधनाध्यक्षस्तथाशिवः।४।ब्रह्मणासहिताःसर्वेदिक्पालाःपांतुतेस
दा।आदित्यावसवोरुद्राविश्वेदेवामरुद्गणाः।५।लोकपालाःप्रयछंतुमंगलानिश्रियं
यशः।गंधर्वाःकिन्नरायक्षाःसिद्धविद्याधरोरगाः।६।अभिनंदंतुतेसर्वेनद्यःसागरप
र्वताः।वेदशास्त्रपुराणानिमीमांसालंकृश्चागमः।७।धर्मकथाचयाचान्यातथाकष्टं
व्यपोहंतु।स्वाहास्वधावषट्कारोजपोहोमस्तथैवच।८।मंत्रास्त्वामभिषिंचंतुषण्मुख
प्रजापतिः।नारदाद्याऋषिगणायेचान्येपितपोधनाः।९।नवंतुयजमानस्यआशीर्वादि
परायणाः।गायत्रीचैवसावित्रीशचीलक्ष्मीःसरस्वती।१०।भवानीमातरःसर्वाजिवंतुव

रहांससंराः आदित्यश्चंद्रमा भौमोबुधजीवसितोर्कजाः। ग्रहास्त्वामभिषिंचंतुराहुकेतुश्चत
र्पिताः। मासाःसंवत्सराःपक्षास्तिथिवारश्चनाडिकाः। मुहूर्तास्त्वामभिषिंचंतुनक्षत्रा
णिदिवानिशौ।१३। अमृतानिशिकोपस्तु। एभिःपुराणैःअभिशेकः। ततःकुंभांबरध
शादिविनायकशांतिसमृध्यर्थंब्राह्मणभोजनसंकल्पः। वस्त्रयुग्मदक्षिणासंकल्पः।
ग्रहप्रीत्यर्थंब्राह्मणभोजनसंकल्पः। धेन्वायुक्तदक्षिणासंकल्पोभूयसीसंकल्पश्च॥
तत्रप्रयोगः। अस्याःविनायकशांतेःसमृध्यर्थंविनायकांबिकयोःप्रीत्यर्थंयथासंपन्ने
नान्नेनतृप्तिपर्यंतभोजनेनशतंब्राह्मणानहंतर्पयिष्ये। तेनश्रीभगवत्यौगणेशां
बिकेप्रीयेतां। अस्माविनायकशांतेःसमृध्यर्थंवस्त्रयुग्मंदक्षिणागुरुवेतुभ्यमहंसं
प्रददे। अस्यनवग्रहहवनकर्मणःसमृध्यर्थंआदित्यादीनांनवानांग्रहाणांप्रीत्यर्थं १३
तत्कुनिसकलबीजोपशांत्यर्थंयथा. नवब्राह्मणानहंतर्पयिष्ये। तेनश्रीभगवंतः

आदित्यादयो नवग्रहाः सुप्रीता भवंतु। अस्य नवग्रहमखकर्मणः समृध्यर्थं धेन्वायुक्
दक्षिणा निष्क्रयं यथासंपन्नं द्रव्यं मनसा सिसंकल्पितं वा। ब्राह्मणे आचार्यऋत्विक्भ्यो न्ये
दं संप्रददे। योयो विभागः स प्रतिगृह्यतां सुखावलोकनैः आज्यैलेन। अथवा सर्वेषां
सुवर्णमेव दक्षिणा। ततः समीपोपविष्टानां ब्राह्मणानां चंदनादिभिः पूजनी ततो भूय
सी संकल्प्य दक्षिणाः पालित्यादि। अस्य विनायकशांतिसहितस्य नवग्रहमखकर्मणो
यन्न्यूनं यदतिरिक्तं तत्सर्वं गणेशांबिकयोः प्रसादात् ब्राह्मणानां प्रसादाच्च सर्वं परि
पूर्णमस्तु। गृहे वृष्ठिरा तानि भवंतु। उत्तरे कर्मण्यविघ्नमस्तु। यजमानमोगाजिकरणं
आशीर्वादपाठः। भद्रासने चरुशेषेण दिक्पालेभ्यो बलिहरणं। ततः स्रुर्पेकृताक्
लायुपहारत्रिधायशांतिघोषेण चत्वरं गत्वा भूमौ उपलेपनं। प्राणायामः। अद्येत्
वीथ्यः देशे च अद्ययोज्यमानेन नवग्रहमखमुखयुतविनायक० समृध्यर्थं तदंगत्वे
चत्वरे देवतानां पूजनमहं करिष्ये। चत्वरदेवदेवतानामिदमत्राएवं पूजनं। प्राणगयान्

सप्तर्षि.
१४

कुशानास्तीर्य गंधपुष्पादिभिरभ्यर्च्य बलिदानं कुर्यात्। तत्र मंत्राः। बलिं गृह्णन्त्विमं देवा
आदित्या वसवस्तथा। मरुतश्चाश्विनौ रुद्राः सुपर्णाः पन्नगा ग्रहाः। असुरा यातुधा
नाश्च पिशाचा मातरो नगाः। शाकिन्यो यक्षवेताला योगिन्यः पूतनाशिवाः।२ जृंभकाः सिद्ध
गंधर्वा मालाविद्याधरा धरा (नगाः)। दिक्पाला लोकपालाश्च ये च विघ्नविनायकाः।३ जगतां शांति
कर्तारो ब्रह्माद्याश्च महर्षयः। मा विघ्नो मा च मे पापं मा संतु परिपंथिनः।४ सौम्या भवंतु
तृप्ताश्च भूतप्रेताः सुखावहाः।५ यजमानोपविश्य शूर्पं भूमौ निधाय इदं वैष्णवं शूर्पसं
स्कृतान्नादिनैवेद्यं भगवतीभ्यश्च तदधिष्ठात्रिदेवताभ्यः आदित्यादिभ्यो देवताभ्यः
नमम। उत्तिष्ठ ब्रह्मण०। यांतु देव० यज्ञं यज्ञं गच्छ०। गच्छ त्वं भगवन्नग्ने स्वस्थानं कुंड
मध्यतः। हव्यमादाय देवेशः शीघ्रं देहि प्रसीद मे। गच्छ गच्छ सुरश्रेष्ठ स्वस्थाने परमेश्वर।
यत्र ब्रह्मादयो देवास्तत्र गच्छ हुताशन। मंडपादिस्थितोपकरणानि आचार्याय दद्यात्। च १४

ग्रहाणां विसर्जनं। तदुपमुक्तदानं। गुरवे समर्पणं।

तुर्भि० नमः। मयायत्कृतं यथा कालं यथा देशं यथा ज्ञानं यथा शक्तिं चलेन श्री म० ताः। तत्स
त्सर्वं ब्रह्मार्पणम० जलं क्षिपेत्। आचार्यं तोषयित्वा। अंजलिं बध्वा। मयायत्कृतं ग्रहारिष्टजनं
तत्कालहीनं नक्रियाहीनं श्रद्धाहीनं च भवतां प्रा० मच्छिद्रं चास्तु। ततः सं० श्रीमच्छिद्रमस्त्विति। तिस्र
वै ब्रूयुः। तेषामत्राशिषो गृहीत्वा म। ब्राह्मणान् भोजयित्वा स्वयं भुंजीतेति। इति विनायकशां
तिसहितासग्रहशांतिः समाप्तिः। अथ विनायक शांति उपहारः। कांपडांर गणेश ३ अंबिकानां
। वस्त्र ४ सुवासिनीनां। नालिकेर ७ चोरवाशेर २। करडिशे० २ सर्वौषधि। सर्वगंधा केसर।
कर्पूर। मोहु ४ टोडरी कलश ४ वस्त्र ४ कलशानां वस्त्रयुग्म दक्षिणा। सप्तधान्य। चरुस्थाली
पंचमृत्तिका। मुद्रापन ४ शूर्प वांसना २ सर्षपा सर्षपातेल। दूर्वा। स्रुवा स्रुचा। उदुंबर स्रुवा व
लरहूं चां मडू। शतपत्रादि नाना विधपुष्पां कुंकुमा पान। फल गूगल। पटला। उस्नाम

स्थापकः। आमाईस्त्री। कुमारा कंबो। मांसं शमावधां।४। दक्षिणा इति॥ अथ ग्रहशांत्युपहारः। वस्त्र
श्वेता। वोरवाम· नारिकेर ५। मुद्रा पन्न १। तिल। यव। घृत। पंचपल्लवान्।२। वग्रही समिधा। द्राक्षा
दिफलानि। ५। विविध पुष्प। धूप २ चंदन यथोक्त नैवेद्य। डामा। वाहि। शमीपत्र। हरिणपात्र। आज्यस्था
ली १ चरुस्थाली। शरावला ४ पंचामृत। धेन्वाद्युक्त दक्षिणा। इति ग्रहशांत्युपहारः॥ १॥
सं·डि·लेविष्णु राजस्य सोर्यादि स्थापनं ततः। वरणं ब्राह्मणानां च ततो मंडासनक्रिया। स्था
पनं कलशादीनां तेषु मुद्रापनादिकं। कुशंडी चरुपाको ते लघु पूजा द्वयोरपि। सप्ततानि घार
णाद्याज्य भागौ ला च कुशंडिका। मंडासनोपविष्टस्य कल्के नोद्वर्तनं ततः। शगधैर्मूर्द्धि विले
पश्च दक्षिणा स्वस्तिवाचनं। कलशैः स्नपनं तस्य ते जहोम श्च मस्तके। यजमाने ब्रयास्नानी ॥१५
चरो राकुत यश्च षट्। विनायकाम्बिका पूजा भूगणामो घृस्तथांजलिः। ५ संकल्पाश्चेव पूजा याउ
पस्था नं ष्टपकष्टयव। कुशंडी स्विष्टकृत् तर्वीयावदुला विसर्जनं। दहोमश्चरा दक्षिणानां च कल्पनामैग

लक्रिया। बलिदानं चरोः शेषाज्ञ्वत्वरक्र्पमोचनौ ७ इति गणशांति पदार्थानुक्रमः। ॐ नमो नवग्रहे
भ्यः॥ अगस्त्यं प्रणिपत्याथ ध्यानस्थं च महामुनिं। नारदो मुनिशार्दूलः पप्रच्छ प्रणतः शुचिः।१।
ग्रहाणां पूजनं ब्रूहि सर्वबाधुःखवरदायिनां। नानाराशिगतानां तु लोकानां हितकाम्यया।२। एकैकस्य
स्य बहुधा पूजनं ...... स्मृतो विवाहादिषु कार्येषु एकधा न पुरातनैः।३। अगस्त्य उवाच। एकैका
शशिखरासीनः सर्वभूतहिते रतः। नारदेन तु पृष्टोऽभूत् तनायो ब्रवीदिदं।४। शृणु नारद
वक्ष्यामि ग्रहाणां पूजनं ग्रहाणां पूजनं यथा। दुःस्थानां मानुषे लोके ग्रहाणां शान्तिर्यथा न वेदा।५
माघादौ च शुभे मासि शुक्लपक्षे समाहितः। शुभे वारे सुनक्षत्रे सुयोगे वर्ज्य वर्जिते।६। ब्राह्म
णांश्च समाहूय यद्दशाष्टौ च स्वशक्तितः। विधाय वरणं तेषां कृताह्निकः क्रियः शुचिः।७। मंडपे
स्थंडिलं कुर्याद्धस्तमात्रं सपीठकं। कुंडं वा पययथान्यायं होमसंख्याप्रमाणतः।८। आचार्यः
प्राङ्मुखो भूत्वा आचम्य प्रयतः शुचिः। अग्निं संस्थाप्य विधिना भूमिपावनपूर्वकं।९। ग्रहाणां
स्थापनं पद्मे मंत्रैः स्वैः स्वैश्च मंत्रवित्। देवताः स्थापयेत्तेषां मंत्रैः स्थाप्याधिदेवताः।१०। जन्मना

सग्रहल्लि
१५

प आपलोर्द्विधिहर्विकं। १५। मंत्रैस्तैलानोलुकर्तव्यः शलमष्टाधिकं यथा। यजमानेन कर्तव्या ५

निनतो मंत्रैर्दिक्पालांश्च तथैव चाष्टजांसंक्षेपतः तथा प्रतिष्ठाक्रान एर्विकां। १५। ईशान्यां कल
शं ष्ठुत्वं स वैषधिसमन्वितं। हैमं रूप्यं तथा ताम्रं मृन्मयं दार्विनिर्मितं। १६। तीर्थोदकेन संपूर्णं
स्थापितं पञ्चकेष्टके।। वेदादिभिश्च मंत्रैस्तु पंचगव्यं ततः क्षिपेत्। १७। पंचरत्नसमायुक्तं पं
चपल्लवसंयुतं। हिरण्यसहितं स्यच्च सवस्त्रं सफलान्वितं। १४। मृत्तिकापंचकयुतं पंचक
षायसंमितं। जपस्तस्मिन्प्रकर्तव्यो मध्ज्ञालेषा गरीयसी। १५। पुष्पचंदनधूपैश्च नैवेद्यैर्वि
विधैः स्वकैः। नानाविधैः फलै रम्यैः श्रीखण्डादिभिरपापि वा। १७। अर्घनाहियपान्याये मंत्रैः स्व
स्वैस्तु पुष्टिदः। अर्घस्तेषां प्रकर्तव्यः फलैर्नानाविधैः स्वकैः। १८। आरात्रिकं विधानेन दापनी
यावलिस्तथा। ष्टजांसमाप्य वैतेषां प्राणिपत्य गुरुं नयेत्। १९। परितस्तरणं कार्यं चरुग्रहणं
ततः स्वशाखोक्तविधानेन कुर्यादग्निमारभेत्कुरुः। २०। चरोस्तु ग्रहणं स्थाल्यां प्रोक्षणं साकारयेत् १६
पक्वं एकत्रस्रुपश्चं कुर्यात्कृत्वा ललउकसनं तथा। २१। आघारावाज्यभागौ च समिद्धोमादिस्त्वं
कैः। समिद्राज्येन चरुणा होमं कुर्याद्यथाविधि। २२। अष्टाधिकसहस्रं तु शतं वाष्टाविंशतिकं।
अष्टो वा तथा कुर्याद्ग्रहाणां चटपदषट्पदं। २३। स्विष्टकृतं तथा कुर्याद्बलिदानं तु कुंडले। वह्नि

16

स्नानं ततः कुर्यात्तत्रशेषं समापयेत् ॥२४॥ ब्राह्मणान्भोजयेत्पश्चाद्दक्षिणाभिश्च तोषयेत् । अभिषेकं ततः
कुर्यान्मंत्रैः पौराणवैदिकैः ॥२५॥ मांगल्यकरणं तस्य यजमानस्य ब्राह्मणाः । आचार्यं तोषयेत्तत्र स
र्वोपस्करसंयोगतः ॥२६॥ धेन्वादिदानयोगेन शांतिस्तस्य न संशयः । जापकेभ्यस्तथा देयात्कुंभं
भोजनपूर्वकं ॥२७॥ त्रयाणामपि वर्णानामेष विधिः सुखावहः । दद्याल्लक्ष्यादक्षिणां तेभ्यो जपकर्मस
मृद्धये ॥२८॥ इति नारदीये मधुराणे शिवसंवादे संक्षेपग्रहपूजनविधिः । अथ ग्रहयज्ञे पदार्थानुक्र
मः ॥ पंचोपचारः । तत्र आदौ चतुर्विंशत्संगुलं कुंडं । तदुत्तरपूर्वे वितस्तिमात्रं वितस्त्युच्छ्रितं स्थंडिलं सं
स्तंभं ग्रहपीठं समिध्संपादनं नैवेद्यानां च । प्राणायामः संकल्पः । आचार्यणाब्राह्मणानां वरणं ॥
अग्निस्थापनं ग्रहस्थापनं । प्रणीता । अग्न्यभिमुखमादित्यस्थापनं सप्तस्वसमस्तव्याहृतिभिः ।
आकृष्णेनेत्यादिभिर्मंत्रैर्ग्रहाणामावाहनं मूलमंत्रैः आवाहनपूर्वं चारैः पदार्थानुसमयेन पूज
नं न लिखितानि एकस्थापनं वर्णानां चरूपरणं । आज्यभागांते समिदाज्यचरुहोमान्कुर्यात्
उद्दनाद्युपहारानन्दयात् । अष्टाविंशतिसंख्या च समिदाज्यचरुहोमे उपहारनिवेदनं ग्रहेभ्यो

५ आज्यलेप्योवा। ततः स्विष्टकृदादिहोमशेषः। ७। भाग्यंविभज्य दक्षिणादानं ब्राह्मणभोजनं। स्वस्त्य
१७ यनं। आकृष्णेनेत्यस्य हिरण्यस्तूप आंगिरस ऋषिः। सूर्यो देवता। त्रिष्टुप्छंदः। समिधहोमे आज्य
चरुहोमे वि॰ १ इमंदेवा इत्यस्य देवा ऋषयः। सोमो देवता। अत्यष्टिछंदः। २ अग्निर्मूर्धेत्यस्य वि
रूप ऋषिः। भौमो देवता। गायत्री छंदः। ३। उद्बुध्यस्वेत्यस्य वैश्वकर्मण ऋषिः। बुधो देवता। गायत्री
त्रिष्टुप् छंदः। ४। बृहस्पते अति यदर्य इत्यस्य गृत्समद ऋषिः। बृहस्पतिर्देवता। त्रिष्टुप्छंदः। ५। अन्ना
त्परिस्रुत इत्यस्याश्विसरस्वतीन्द्र ऋषयः। शुक्रो देवता। अतिजगती छंदः। ६। शन्नोदेवीरभि
ष्टये दध्यङ्ङाथर्वण ऋषिः। शनिर्देवता। गायत्री छंदः। ७। कांडात्कांडादित्यस्य अग्निर्ऋषिः। राहु
र्देवता। अनुष्टुप्छंदः। ८। केतुं कृण्वन्नित्यस्य मधुच्छंदा ऋषिः। केतवो देवता। गायत्री छंदः। स
मिदाज्यचरुकहोमे विनियोगः। ९। अथ विनायकस्नपनं। अथ गोभिलाचार्योक्तसमिधलक्षणं। स
मिधां लक्षणं वक्ष्ये संख्या कामांश्च पैव च। विशीर्णा द्विदला ह्रस्वा वक्रा स्थूला कृशा द्विधा। कृमि ५
दष्टाश्च दीर्घाश्च निःस्नेहाश्च परिवर्जिताः। १। विशीर्णायुः क्षयं कुर्याद् द्विदला व्याधिसंभवा। ह्रस्वा

पांमृत्युमाप्नोति वक्त्रा विघ्नकरी तथा ॥२॥ स्थूलाभिहरले लक्ष्मीं कृशाः क्षीयंते याचकाः । छिद्रा तु
नेत्ररोगाय कीटदृष्टार्थनाशनी ॥३॥ द्वेष्यं प्रकुरुते दीर्घा प्राणघ्नो निस्त्वचः स्मृता । अरुणा सु
समीस्थूलाग्रशाखा च पलाशिनी ॥४॥ सस्त्रीरानाधिका नो नासस मिधः सर्वकामदाः । आ
रूपक्कां समच्छेदां तर्जन्यंगुलिवर्तुलां ॥५॥ ईदृशीं होमयेत्प्राज्ञः प्राप्नोति विपुलां श्रियं । औते कर्म
णोस्मार्त्ते च समिधः परिकीर्त्तिताः ॥६॥ न मुक्ताकेशगे जुहुयान्नाग्निपातिलजानुकः । अग्निपातिन
जान्वोस्तु राक्षसैर्ह्रियते हविः ॥७॥ उत्तानेनैव हस्तेन अंगुष्ठाग्रेण पीडितं । संहतांगुलिपा
णोस्तु वाग्यतो जुहुयाद्धविः ॥८॥ होतव्यं सुसमिद्धेग्नौ द्रव्यपात्रार्थसंपदः । विधूमे लेलिहाने
च कर्मसिद्धिर्नो रेन्यथा ॥९॥ अल्पतेजास्वरूक्षश्च विस्फुलिंगैश्च सर्वशः । ज्वालाधूमावली
द्वजातवेदास्त्वसिद्धिदः ॥१०॥ गंवामंगेषु तिष्ठंति भुवनानि चतुर्दशा दानात्तस्याः श्रियं दे
हि इहलोके परत्र च ॥११॥ सप्तमैकशतं पत्रं गवां तिष्ठंति संस्थले । वालवत्सप्रसूतानां गो चर्म
इति तद्विदुः ॥१२॥ यथा भूमिप्रदानस्य कलां नार्हन्ति षोडशीं । दानान्यन्यानि शोतेर्मरमिहन्ना

स०ग्रहवि०
१८।

भवति ॥१३॥ आयुष्यं विद्यां च तथा सुखं च शत्रुक्षयं राज्यसुखं जितं च। धर्मार्थकामान् बहु पुत्र
ताच तुष्टाय हा सर्वमेतद्दिशंति ॥१४॥ त्रिंशांगुलं तु कर्तव्यमंतरं कुंडपीठयोः। एतन्महर्षिभिः प्रोक्तं
मानं हीनाधिकं न हि ॥१५॥ त्रिंशांगुलं तु कर्तव्यं ग्रहपीठं कुंडपीठयोर्मध्ये किंचिदंतरं। कृत्वा प्राक्
सूत्र मर्म्मे मर्द्धं केदक्षिणोत्तरयोः मस्ययोः। न्यस्य सूत्रं ततः कोणोरं कि लैश्च तुरस्र कं ॥१६
नभिस्यां न च कोणे स्ले न च रथ्यांगतोपि वा। अष्टहस्ताधिको वेधोन वेधः परिकीर्त्तितः ॥१७॥
पंचमीशांपुरो न्यस्य मध्ये वेदांशमानतः। अग्रमादश्वस्य पत्राभं कुंडमाग्नेय मुच्यते ॥१८॥ इति समा
प्तं ॥ ॥ ॥ अस्य स्वस्तिवाचन कर्मणः प्रतिष्ठासिध्यर्थं हिरण्यदक्षिणां एतत्सर्वं आ
चार्यप्रमुखेभ्यः स्वस्तिवाचकेभ्यो जापकेभ्यो ऋत्विक्त्विग्भ्यश्चाहं संप्रददे। यो यो विनागः सप्र
तिग्रहणतां। दक्षिणाः पांतु सा॥ देश काले सकीर्त्यमुक कामः समृध्यर्थं आदित्यादि नवग्र
हसकल सूचित बाधोपशांत्यर्थं आदित्यादि नवानां ग्रहाणां प्रीत्यर्थं आदित्यादि नवानां ग्रहाणां
पूजनमहं करिष्ये। अस्मिन् नवग्रह मख प्रवृत्तौ विनायकस्नपनकर्मणि आचार्य एतत्ते पाद्यां एत १८

।।कुलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः। मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः।। कुक्षौ तु सागराः सप्त सप्तद्वीपा वसुंधरा।
ऋग्वेदोथ यजुर्वेदः सामवेदो ह्यथर्वणः।। अंगैश्च सहिताः सर्वे कलशं तु समाश्रिताः।। अत्र गायत्री सावित्री शांतिपुष्टिकरी तथा।
आयांतु यजमानस्य दुरितक्षयकारकाः।। देवदानवसंवादे मथ्यमाने महोदधौ। उत्पन्नोसि तदा कुंभ विधृतो विष्णुना स्वयं।
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः। त्वयि तिष्ठंति भूतानि त्वयि प्राणाः प्रतिष्ठिताः।। शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः।
आदित्या वसवो रुद्रा विश्वेदेवाः सपैतृकाः। त्वयि तिष्ठंति सर्वेपि यतः कामफलप्रदाः।। त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव।।
सांनिध्यं कुरु देवेश प्रसन्नो भव सर्वदा।।१।। ।।यात्रिक सर्वो सा।। ५५।

।।श्री।। सुरास्त्वामभिषिंचंतु ब्रह्मा विष्णुमहेश्वराः।। वासुदेवो जगन्नाथस्तथा संकर्षणो विभुः। प्रद्युम्नश्चानिरुद्धश्च भवंतु विजयाय ते।
।। आखंडलोग्निर्भगवान् यमो वै नैरृतिस्तथा। वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः। ब्रह्मणा सहिताः सर्वे दिक्पालाः पांतु ते सदा।
।। कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः। बुद्धिर्लज्जा वपुः शांतिस्तुष्टिः कांतिश्च मातरः। एतास्त्वामभिषिंचंतु [illegible] समागताः
।। आदित्यश्चंद्रमा भौमो बुधजीवसितार्कजाः। ग्रहास्त्वामभिषिंचंतु राहुः केतुश्च तर्पिताः। देवदानवगंधर्वा यक्षराक्षसपन्नगाः।
।। ऋषयो मनवो गावो देवमातर एव च। देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः। अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च।
।। औषधानि च रत्नानि कालस्यावयवाश्च ये। सरितः सागराः शैलास्तीर्थानि जलदा नदाः। एते त्वामभिषिंचंतु सर्वकामार्थसिद्धये।
ॐ बध [illegible]
कलसूचिल बा
नमह करीष्यो चैं

।।श्रितस्सर्वदा।। स्थानस्थः कातु नस [illegible] यत्र स्थं तत्र गच्छतु।। अपक्रामंतु भूतानि पिशा
।यर [illegible]

शांति
१९

नवविंशे ॥१२॥ आयुः प्रक्षालनं । स्वस्तिवाचकैः तत्त्वे पाद्यां सविकरण तत्ते ततः स्वकीयो[illegible]प
चतुष्टय हाः सर्व[illegible]स्तत्ते सारिपठनं । चतुर्भिर्विनिप्रार्थना । ब्राह्मणेन रक्षमायम्याद्वि[illegible]
[illegible]हन्ना[illegible]विना । यकशांति पद्धतिः समाप्तः । याज्ञिकसर्वात्मौ सुतउद्देकक्षेनलेखी
[illegible]प[illegible]ता ॥ शुभं नवतु ॥ शिवार्पणमस्तु । लेखकपाठकयोः शुभं भूयात् ॥

[illegible] ॥ शं तु[illegible]रस्यांदिग्भागे द्विहस्तपीठमाचरेत् । किंचिन्मध्योन्नतं कुर्यात् चतुर्भुजे द्वादशांगुली
[illegible] [illegible]ननुकर्तव्यं मेखलां कुंडपीठयोः । एतन्मौहर्षिभिः प्रोक्तं मानहोमाधिकेन तु ।
कुं[illegible]प्रागुदीच्यां वा प्रतीच्यां दक्षिणेपि वा । चतुर्दिक्षु चतुर्द्वारं कर्तव्यं ग्रहपीठकं ।
श्री[illegible]शुभे ग्रहविधौ अग्निर्लक्षहोमे पराजितः । कोटिहोमे शिवो वह्निः सर्वकामप्रदायकः । १
[illegible]तु । लक्षहोमे तु वह्निः स्यात् कोटिहोमे हुताशनः ।